**संस्कृत वार्ता:**

**दिनाङ्क : 21/08/2026**

**सायम 06:20**

**<u>आदौ मुख्यवार्ता:</u>**

· भारतीय-नाविक-समुदायस्य कल्याणम् सुरक्षां च भारतस्य उच्चप्राथमिकता अस्ति इति अद्य सर्वकारः पुनरुद्घाटयत्।

· भारत-प्रशासनं चल-दूरवाणी-निर्माण- MPMS इत्यस्याः पञ्चशतोत्तर-द्विषष्टि-सहस्र- कोटि-रूप्यकाणां योजनायाः उद्घाटनम् अकरोत्।

· केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य पश्चिमबङ्गालस्य सिलिगुडी-नगरे सशस्त्र-सीमा-बलस्य मुख्यालये प्रायः नवसप्तत्यधिकैकशत- कोटि-रूप्यकाणां अनेकानां परियोजनानां उद्घाटनम्, शिलान्यासञ्च कृतवान्।

· पुणे-नगरे आयोजितस्य द्वादश- ब्रिक्स्-सम्प्रेषण-मन्त्रिणां सभायां दूरसञ्चार-सूचना-सञ्चार-तन्त्रज्ञानक्षेत्रादिषु सहकारं प्रगाढीकर्तुं भारत-ब्राजीलदेशौ सन्धि-पत्रे हस्ताक्षरं कृतवन्तौ।

· ईरान-देशः स्व-देशं विरुध्य दत्तान् आर्थिक-प्रतिबन्धान् निराकर्तुं उक्तवान् यत् एतादृश्यः विफल-नीतयः ईरान-जनेषु अधिकां शत्रुतां जनयिष्यन्ति।

· **अपि च,**

· भारतस्य काजल-ढोचक-नाम्नी द्वन्द्व-युद्धक्रीडिका क्रमशः द्वितीयवारम् अन्तःविंशतिवर्षीयानां विश्व-द्वन्द्व युद्ध-स्पर्धायां स्वर्णपदकं प्राप्तवती।

**<u>अथ वार्ताः विस्तरेण</u>**

**<u>भारतीय-नाविक</u>**

भारतीय-नाविक-समुदायस्य कल्याणम् सुरक्षां च भारतस्य उच्चप्राथमिकता अस्ति इति अद्य सर्वकारः पुनरुद्घाटयत्। नवदेहली-नगरे प्रसारमाध्यमान् सम्बोधयन् विदेशमन्त्रालयस्य प्रवक्ता रणधीर् जायसवालः अवदत् यत् भारतं पश्चिम-एशियायाः विकासान् निकटतया निरीक्षमाणम् अस्तीति। विदेशीय-ध्वजयुक्तयोः नौकयोः घटनायाः विषये कथयन् जैसवालः अवदत् यत् सर्वे द्वाविंशति नाविकाः सुरक्षिताः सन्ति, तेषां सुरक्षायै कल्याणाय च विषयेऽस्मिन् सम्बद्धैः अधिकारिभिः सह सर्वकारः सम्पर्कं कुर्वन् अस्तीति।

सेनाध्यक्षस्य जनरल् धीरज् सेठ् इत्यस्य नेपालयात्रायाः विषये प्रवक्ता अवदत् यत् तस्य भ्रमणकाले सेनाप्रमुखाय मानद-जनरल्-पदम् प्रदत्तम् आसीत् इति। सः अवोचत् यत् एतत् द्वयोः देशयोः सशस्त्रसेनायाः च मध्ये दीर्घकालिनं मैत्रीम् प्रतिबिम्बयतीति। विदेशमन्त्रालयस्य सचिवस्य श्रीप्रिया रङ्गनाथन् इत्यस्याः फिलिस्तीन-देशयात्रायाः विषये, विदेशमन्त्रालयस्य प्रवक्ता अवदत् यत् तस्याः यात्रायाः समये सा तत्रत्याय दृढविकासाय सहभागि भवितुं भारतस्य प्रतिबद्धतां प्रकटितवती इति। सः इत्यपि अवदत् यत् सचिवः फिलिस्तीन-देशस्य जनानां स्वास्थ्यस्य आवश्यकतायै जीवनरक्षक-औषधान्यपि समर्पितवान् इति।

**वैष्णव-MPMS**

सूचना-प्रौद्योगिकी-केन्द्रीयमन्त्री अश्विनी-वैष्णवः अद्य चल-दूरवाणी-निर्माण-योजनायाः - MPMS इत्यस्याः उद्घाटनम् अकरोत्। केन्द्रीय-मन्त्रिमण्डलेन गत-मासे पञ्चशतोत्तर-द्विषष्टि-सहस्र- कोटि-रूप्यकाणां व्यय-विनियोगेन सह एषा योजना अङ्गीकृता आसीत्।

**पश्चिम बङ्गाल-अमित शाहः**

केन्द्रीय-गृह-मन्त्री अमितशाहः अद्य पश्चिमबङ्गालस्य सिलिगुडी-नगरे सशस्त्र-सीमा-बलस्य मुख्यालये प्रायः नवसप्तत्यधिकैकशत- कोटि-रूप्यकाणां अनेकानां परियोजनानां उद्घाटनम्, शिलान्यासञ्च कृतवान्। समारोहानन्तरं कार्मिकान् सम्बोधयन् गृहमन्त्री अवदत् यत् यदा भाजप-सर्वकारः केन्द्रे सत्तां प्राप्नोत्, सीमा-सुरक्षार्थं उत्तरदायिनां कर्मचारिणां कल्याणाय सर्वोच्चप्राथमिकता दत्तास्तीति। सः अधोरेखितवान् यत् एस्. एस्. बीति बलम् नेपाल-भूटान् इत्यादिभिः देशैः सह मुक्तसीमायाः रक्षणस्य समाव्हनपूर्णं कार्यं निर्वहति, एतत् कठिनतमेषु कर्तव्येषु अन्यतमम् इति सः उक्तवान्। अपि च, सः उल्लिखत् यत् सिलिगुडी-मार्गस्य महत्त्वं अवगन्तुं केन्द्रसर्वकारेण अस्मिन् प्रदेशे निरीक्षणं प्रवर्धितम् अस्तीति।

**विराम**

**संस्कृतवार्तायाः संस्करणमिदम इदानीम आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले www.newsonair.gov.in इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**ब्रिक्स-**

अद्य दूरसञ्चार- सूचना-सञ्चार-तन्त्रज्ञानक्षेत्रादिषु सहकारं प्रगाढीकर्तुं भारत-ब्रज़िल्-देशौ सहमति-पत्रे हस्ताक्षराणि अकुरुताम्। सामाजिक-प्रसार-माध्यमे, दूरसञ्चार-विभागः अवदत् यत् एषा सन्धिः डिजिटल्-नवान्वेषणस्य प्रगत्या सह डिजिटल्-आधारिकसंरचनायाः सुदृढीकरणञ्च करिष्यति, उदयोन्मुखप्रौद्योगिकीनां सहकारं च वर्धयिष्यति। पुणे-नगरे आयोजितस्य द्वादश- ब्रिक्स्-सम्प्रेषण-मन्त्रिणां सभायाः पार्श्वे केन्द्रीय-सम्प्रेषण-मन्त्रिणा ज्योतिरादित्य-माधव-सिन्धिया इत्यनेन ब्राज़िल्-देशस्य सम्प्रेषण-मन्त्रिणा फ्रेडरिको-डी-सिक्वीरा-फिल्हो-वर्येण च एम्. ओ. यू. इत्यस्मिन् हस्ताक्षरं कृतम्। केन्द्रीयमन्त्री सिन्धिया एकस्मिन् प्रसारसन्देशे उक्तवान् यत् एम्. ओ. यू. इत्यनेन सार्वत्रिक-सम्पर्कः, साइबर-सुरक्षा, डिजिटल-सार्वजनिक-आधारिकसंरचना, उदयोन्मुख-प्रौद्योगिकीः, क्षमता-निर्माणम्, उत्तम-आचरणानां आदानप्रदानम् इत्यादिषु विषयेषु द्वैपाक्षिक-सहयोगः गहनः भविष्यतीति। सः उक्तवान् यत्, सुरक्षित-समावेशयुताय डिजिटलेति भविष्याय भारत-ब्राज़िल-सहयोगस्य सुदृढीकरणार्थं दृढं पदम् अस्ति इति। आयोजनस्यास्य अध्यक्षः केन्द्रीय-सम्प्रेषण-मन्त्री ज्योतिरादित्यसिन्धिया स्वस्य प्रारम्भिक-भाषणे भारतस्य भविष्यस्य विषये दृष्टिं निरूपयन् उक्तवान्, यत् प्रधानमन्त्री-नरेन्द्र-मोदी-वर्यस्य डिजिटल्-इण्डिया इत्यभियानं प्रति प्रतिबद्धतया मार्गदर्शितं स्थितिस्थापकम्, विश्वसनीयम्, नवान्वेषिणं, सशक्तीभूतं, सर्वसमावेशयुतञ्च भवतीति भारतस्य दृष्टिकोणम् अधोरेखितवान्।

**ईरान-अमेरिका-आर्थिक-सङ्कटम** 

ईरान-देशस्य विदेश-मन्त्री श्रीअब्बास-अरागची इत्येषः स्व-देशं विरुध्य दत्तान् आर्थिक-प्रतिबन्धान् निराकुर्वन् उक्तवान् यत् एतादृश्यः विफल-नीतयः ईरान-जनेषु अधिकां शत्रुतां जनयिष्यन्ति, अधिकां विफलताम् आनेष्यन्तीति च। अरागची-इत्यस्य इमाम् टिप्पणीं ट्रम्पेन ईरान-विरुद्धं कठोर-आर्थिक-पदक्षेपोत्थापनरूपेण स्वीकृतम्।

**सर्वोच्चन्यायालयेन विध्यभ्यासः**

सर्वोच्चन्यायालयेन अद्य स्वस्य पञ्चविंशत्यधिक-द्विसहस्रतमवर्षस्य मे-मासिक-निर्णये परिवर्तनं कृत्वा, प्रवेश-स्तरीय-न्यायिक-सेवा-परीक्षासु भागं ग्रहीतुं विधि-स्नातकानां कृते पूर्वतनस्य अनिवार्य-त्रिवर्षीय-विधि-अभ्यासस्य आवश्यकतां एकवर्षं यावत् न्यूनीकृतमस्ति। मुख्यन्यायाधीशः सूर्यकान्तः, न्यायमूर्ती ए.जी. मसिहः, के. विनोदचन्द्रन् च इत्येतैः मिलित्वा मतद्वयस्य प्रत्युत्तरे एकेति विभक्तनिर्णये, समीक्षा-याचिकां निराकृत्य एतदुक्तम्।

**झारखण्ड-उच्चन्यायालयः**

झारखण्ड-उच्चन्यायालयेन जे. एस्. एस्. सी.-सी. जी. एल्. अथ सी. डी. पी. ओ. परीक्षाभ्यः नियुक्ति- निरसनस्य राज्यसर्वकारस्य आदेशस्य विषये अन्तरीम-स्थगनम् अस्थापयत। याचकाः न्यायालयस्य पुरतः तर्कं कृतवन्तः यत् विज्ञापनानि नियुक्तयश्च आकस्मिकरूपेण निरशनात्मकः सर्वकारस्य निर्णयः विहितनियमानां अनुरूपः नासीदिति। न्यायालयेन अस्मिन् विषये अग्रिमस्य विचारणायाः दिनाङ्कः सितम्बरमासे निर्धारितोऽस्ति। उच्चन्यायालयेन, एकदिवसपूर्वमपि जे. पी. एस्. सी. नियुक्ति-निरस्तस्य राज्यसर्वकारस्य आदेशस्य विषये अपि अन्तरीम-स्थगनम् स्थापितमासीत्। परीक्षाणां निरस्तीकरणार्थं षड्विंशति- दिनानि यावत् आन्दोलनं

कृतवन्तः छात्राः आरोपयन् यत् सर्वकारः समुचितं विधि-परामर्शं विनैव निर्णयम् अघोषयदिति।

**औषधीयोपकरणानि**

औषध-विभाग-सचिवः मनोजजोशी अद्य चिकित्सा-उपकरण-उद्यमम् आग्रहयत् यत् भारतस्य विनियामक-संरचनायाः निर्माणे बृहत्तरं निवेशं प्रदातव्यम् इति, नवदेहल्यां सी. आई. आई. ग्लोबल् मेड्टेक इत्याख्यं शिखरसम्मेलनं सम्बोधयन् श्रीजोशीवर्यः अवदत् यत् विनियामक-चर्चासु उद्योगस्य सहभागिता सम्प्रति परिमिता अस्ति। श्रीजोशी चिकित्सा-उपकरण-विन्यासानां, समाप्त-उत्पादानां च दृढतर-परीक्षणस्य आवश्यकताम् अपि अधोरेखितवान्।

**गोयल-सिंगापुर-यात्रा**

वाणिज्य-उद्योग-मन्त्री पीयूष गोयलः सिंगापुर-देशेन सह समग्र-एशिया-खण्डेन सह आर्थिक- सहयोगं प्रगाढीकर्तुं, व्यवसाय-स्तरे परस्पर-सहयोगं दृढीकर्तुं च भारत-देशस्य प्रतिबद्धतायाः विषये बलं दत्तवान्। तेन "प्रधानमन्त्री-नरेन्द्र-मोदी-महोदयस्य नेतृत्वे 'ईज़-ऑफ-डूइंग-बिज़नेस' इति व्यवस्थायाः सुदृढीकरणाय सर्वकारस्य प्रयत्नाः च प्रकाशिताः। श्रीगोयलः सिंगापुर-देशस्य विदेश-व्यापार-उद्योग-राज्यमन्त्रिणा श्रीगैन-सियो-हुआंगेन सह अन्यैः च गणमान्य-व्यक्तिभिः सह अपि मिलितवान्।

**IMD-मौसम-विज्ञानम**

भारत-ऋतु-विज्ञान-विभागः अद्य पूर्व-मध्य-प्रदेशे अत्यधिक-वर्षायै "नारङ्ग-संचेतनां" प्रख्यापितवान्।

## U20- द्वन्द युद्धम

भारतस्य काजल-ढोचक-नाम्नी द्वन्द्व-युद्धक्रीडिका क्रमशः द्वितीयवारम् अन्तःविंशतिवर्षीयानां विश्व-द्वन्द्व युद्ध-स्पर्धायां स्वर्णपदकं प्राप्तवती। सा निर्णायक-द्वन्द्वे चीन-देशीयां जिंगरू-सन्-नाम्नीं क्रीडिकां सप्त-शून्याङ्कैः पराजित्य षट्सप्तति-किलोग्राम-वर्गे सुवर्ण-पदकं लब्धवती।

**॥ इति वार्ता: ॥**